# P. R. THAKUR GOVT. COLLEGE

B.A. HONOURS PART-III

PAPER - VII

CBSE SEMESTER – V

CC-12 (SANACOR12T)

**TARAK MAJUMDER**

# करण-कारकम्

# साधकतमं करणम् 1.4.42

- क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञा स्यात्।
- तमव्ग्रहणं किम् गंगायां घोषः।

बालकः



लेखनी



बालकः लेखन्या लिखति



बालकः हस्तेन खादति
माता दीपेन पूजयति ।
वृद्धा दण्डेन कुक्कुरं ताडयति ।
बालकः चमसेन खादति ।
व्याधः वाणेन मृगं हन्ति ।
आरक्षकः दण्डेन चौरं ताडयति ।
भक्तः हस्ताभ्यां देवं प्रणमति ।
गणेशः मूषकेण गच्छति ।

महिला **मालया** अलंकरोति ।
स **छुरिकया** शाकं कर्तयति ।
अहं **कुञ्चिकया** तालम् उद्घाटयामि ।
बालकः **द्विचक्रिकया** गच्छति ।
आपणिकः **तुलया** तोलयति ।
अध्यापिका **लेखन्या** लिखति ।
सौचिकः **सूच्या** वस्त्रं सीव्यति ।
महिला **द्रोण्या** जलम् आनयति ।

| प्रथमायाः एकवचनम् | तृतीयायाः एकवचनम् | तृतीयायाः द्विवचनम् | तृतीयायाः बहुवचनम् |
|---|---|---|---|
| घटः | घटेन | घटाभ्याम् | घटैः |
| छात्रः | | | |
| वृद्धः | | | |
| सर्पः | | | |
| मूर्खः | | | |
| भृत्यः | | | |
| पुत्रः | | | |
| जनकः | | | |
| शिक्षकः | | | |

| प्रथमाया एकवचनम् | तृतीयाया एकवचनम् | तृतीयाया द्विवचनम् | तृतीयाया बहुवचनम् |
|---|---|---|---|
| महिला | महिलया | महिलाभ्याम् | महिलाभिः |
| बालिका | | | |
| अध्यापिका | | | |
| मापिका | | | |
| माला | | | |
| नदी | नद्या | नदीभ्याम् | नदीभिः |
| लेखनी | | | |
| भगिनी | | | |
| मार्जनी | | | |

| प्रथमाया एकवचनम् | तृतीयाया एकवचनम् | तृतीयाया द्विवचनम् | तृतीयाया बहुवचनम् |
|---|---|---|---|
| पुस्तकम् | | | |
| पुष्पम् | | | |
| पर्णम् | | | |
| वस्त्रम् | | | |
| आम्रम् | | | |
| उपनेत्रम् | | | |
| व्यजनम् | | | |
| चित्रम् | | | |
| फलम् | | | |

# कर्तृकरणयोस्तृतीया 2.3.18

- अनभिहिते कर्तरि करणे च तृतीया स्यात्।
- रामेन वाणेन हतो बाली।

- दिवः कर्म च 1.4.43
  - दिवः साधकतमं कारकं कर्मसंज्ञं स्यात्। च्यात् करणसंज्ञं। अक्षैः अक्षान् दीव्यति।

দিব্ ধাতুর করণকারক বিকল্পে কর্মসংজ্ঞা প্রাপ্ত হয়। অতএব কর্মকারকে দ্বিতীয়া বিভক্তি হয়।

# अपवर्गे तृतीया 2.3.6

- अपवर्गः फलप्राप्तिः। तस्यां द्योत्यायां कालाध्वनोरत्यन्तसंयोगे तृतीया स्यात्।
- अह्ना अनुवाकः अधीतः।
- क्रोशेन अनुवाकः आधीतः।
- अपवर्गे किम् मासमधीतो नायातः।

# सहयुक्तेऽप्रधाने 2.3.19

- सहार्थेन युक्ते अप्रधाने तृतीया स्यात्। पुत्रेनण सह आगतः पिता।
- एवं सार्धं समं योगेऽपि। विनापि तद्योगं तृतीया – वृद्धोयूना ..... (1.2.65) इत्यादि निर्देशात्।

पुत्रः गच्छति





पिता गच्छति

पित्रा सह पुत्रः गच्छति



अर्जुनः **भगिन्या** सह क्रीडति

राजा **मुनिना** सह वार्तालापं करोति

**मात्रा** सह कन्या गच्छति

स **अतिथिभिः** सह उपविशति

बालिकाः **शिक्षिकाभिः** सह भ्रमनार्थं गच्छन्ति

राम **कपिभिः** सह लङ्काम् अगच्छत्

# येनाङ्गविकारः 2.3.20

येनांगेन विकृतेन अंगिनो विकारो लक्ष्यते ततस्तृतीया स्यात्।
अक्ष्णा काणः। अक्षिसम्वन्धिकाणत्वविशिष्ट इत्यर्थः।
अंगविकारः किम् ? अक्षि काणमस्य।